# ॥ संस्कृत कथा नाटक कौमुदी ॥

**प्रथमः पाठः**

## महात्मनः संस्मरणानि

*[ महात्मा गाँधी का पूरा नाम मोहनदास करमचन्द गाँधी है, पर हम भारतवासी उन्हें महात्मा गाँधी या केवल महात्मा जी के नाम से स्मरण करते हैं। वे राष्ट्रपिता भी कहलाते हैं क्योंकि उन्होंने अपनी सत्यनिष्ठा, अहिंसा और सत्याग्रह के बल पर देश को पराधीनता से मुक्त कराया। प्रस्तुत पाठ में महात्मा जी के उन्हीं गुणों का संक्षेप में वर्णन है। ]*

कोटिकोटिभारतजनलोचनतपरा मोहनदासकरमचन्दगान्धी पोरबन्दरनगरे जन्म लेभे। अस्य पिता करमचन्द गान्धी धर्मात्मा, निर्भीकः, सदाचारैकप्रवणः, सत्यप्रियः, धीरः, गम्भीरः, गतगर्वः, मानी, धनी, चासीत्। मातापि "पुतलीबाई" धर्मरता, व्यवहारे चतुरा, महिलोचिताऽऽदर्शमूर्तिः, स्वभावतो मधुरा, पूजापाठव्रतोपवासप्रभृति क्रियानुयाता, रुचिरचरित्रा, परमपवित्रा चासीत्।

पुत्रे मातापित्रोर्गुणगणसङ्क्रमणं जातम्। मणिकाञ्चनयोगे सुगन्धसम्मिश्रणमिव प्रजातम्। मोहनदासः पितेव सत्यप्रियः निर्भयो जातः। सर्वदा बालो मोहनः पुस्तकेष्वेव रमते स्म। मोहनोऽयमध्ययनशीलः नियतपाठाभ्यासी चासीत्।

एकदा गृहसमीप एव यायावरोऽभिनेतृवर्ग एकमभिनयं प्रादर्शयत् मित्रैः साकं मोहनोऽपि तं द्रष्टुमगच्छत्। हरिश्चन्द्राभिधे तस्मिन् नाटके राज्ञः हरिश्चन्द्रस्य चरित्रं चित्रितम्। नाटकेनानेन अयं हरिश्चन्द्र इव सत्यसन्धः सच्चरित्रश्च भवितुमाचकाङ्क्ष। कियानपि कठिनो मार्गोऽयं भवतु।

"गाइल्स" नामा विद्यालयनिरीक्षकः बालानां वर्णविन्यासं परीक्षितुमेकदा विद्यालयमागतः। तदा मोहनदासं विहाय सर्वे बालाः शुद्धवर्णविन्यासमकार्षुः। ते हि पञ्च साधारणशब्दान् शुद्धं लिखितुमाज्ञप्तासन् मोहनदासः 'केटल' इत्यस्य वर्णविन्यासं कर्तुं नाशक्नोत्।

आत्मनां सन्दिग्धां प्रतिष्ठां चिन्त्यमानाः शिक्षकाः आतङ्किता आसन्। ते हि शिक्षका निकटस्थश्यामपट्टतस्तत्पदविन्यासमनुकर्तुमिङ्गितेन स्वान्तेवासिनं प्रेरयामासुः। यद्यपि तदानीं निरीक्षकस्यापि ध्यानमन्यत्रासीत्। तथापि मोहनः सम्मुखमवलोकयन् आत्मानमपवञ्चनातो विरतमकरोत्। अयमात्मन्यनादरमन्वभवत्। सहाध्यायिनामुपहासभूमिः शिक्षकाणां कोपभाजनञ्च स्यामिति व्यजानात्। वञ्चनातः सत्यस्य कदापि प्रच्छादनं भवितु नार्हति। मूल्यमेतस्य यत्किमपि भवतु नामेति समवगच्छन्नयं तदा मौनावलम्बनमेवावृणोत्।

कक्षाया अनन्तरं मोहनस्य शिक्षकोऽकुप्यत् तस्मै। यद्यपि "केटल" इति वर्णविन्यासघटना प्रत्यपादयदस्य सत्यप्रियत्वम्। तथापि गतेषु वर्षेषु सर्वेषां शिक्षकाणामयं प्रीतिमानुकल्यञ्च समुपार्जयत्।

अयं सर्वदा सत्यमेव वदतिस्म। सत्यं प्रति निष्ठावतां कृते मौनं शक्तिशालिशस्त्रं भवतीति कथयन्नात्मानमयं समाश्वासयत्। तत् (मौनं) मिथ्याभाषणतस्तं बहुधा न्यवारयत्।

1893 तमे ख्रिष्टाब्दे अप्रैलमासे मुम्बईमहानगर्या पोतमारुह्य मासानन्तरमयं दक्षिण-अफ्रीकादेशस्य नेटालनगरेऽवारोहत्। अतिपीडाकरं दृश्यं दक्षिण अफ्रीका देशे दृष्टमनेन। एतस्य स्वदेशीया जनास्तत्र तिरस्कृता नितरामुपेक्षिताश्चासन्। शिक्षासम्पन्ना अपि भारतीया दक्षिण अफ्रीका-वासिभिर्यूरोपदेशोद्भवैश्च साकं सम्मिलितुं

नाधिकृता अभूवन्। एते हि वर्णतः श्यामास्तद्वर्णं चाभद्राणां प्रतीकतया प्रतीतमासीत्। बहवस्तेषां भारवाहकरूपेणाभिहिता आसन्। एतदपमानस्य सङ्केतः। गान्धिमहोदयः भारवाहकवर्गस्य विधिवेत्तेति नाम्ना प्रथितोऽभवत्।

एकदा प्रिटोरियानगरं प्रति धूमयानेन यात्रां कुर्वन्नयं प्रथमकक्षस्य निदर्शनपत्रमादाय निर्दिष्टकक्षे समुपाविशत्। किन्तु न चिराय तत्रातिष्ठत् निर्दिष्टस्थाने यदा धूमयानं व्यरमत् यूरोपदेशीयः कश्चन यात्री तत्रागच्छत्। कक्षाभ्यन्तरे श्यामवर्णं मानवमेनं वीक्ष्य धूमयानाधिकारिणः सविधे प्रसङ्गमुपालभत्। धूमयानाधिकारिणः अमुमाक्रम्य बहिरक्षिपत्। बहुशैत्यकरीयामिन्या इयं नववादनवेला आसीत्। शीतेन वेपमानोऽयं सम्पूर्णां रात्रिं प्रतीक्षालयेऽयापयत्।

इमे पीडाकरा अनुभवा दक्षिण-अफ्रीका देशे स्थितानामात्मीयजनानां दुःखजातान्युन्मूलयितुं गान्धीमहाशयस्य हृदये गरीयसीमिच्छामुत्पादितवन्तः यदाऽयं प्रिटोरियानगरं सम्प्राप्तवान्।

तदा तत्र भारतीयैः साकं सम्मेलनमारभत। पृथग्रूपेण ते सुकरतया गौरांगैरुत्पीडिता भवन्तीति तानेकसूत्रे निबद्धुमयमैच्छत्।

गान्धीमहाशयः उपादिशत् विद्वेषस्य स्थाने प्रेमाचारं हिंसायाः स्थाने आत्मोत्सर्गं शारीरिकस्य सामर्थ्यस्य स्थाने चात्मबलम्। निखिलाश्चैते सिद्धान्ताः दक्षिण अफ्रीकादेशे तस्य परीक्षिता आसन्।

अद्यतन इव गान्धिकालेऽपि पञ्चनदप्रान्ते उग्रवादिनां समस्यासीत्। जनाः अपमानजनकैर्व्यवहारैर्दमिताः कशाभिरभिहताश्चासन्। गान्धीमहाशयः ब्रिटिशशासकस्योपरि विश्वासं तत्याज। गान्धीमहाशयस्य प्रतिभा जनतासु स्वाभिप्रायस्य प्रतिपादनक्षमतामुपार्जयत्, निरक्षराणां सहस्त्रजनानां मध्ये सुबोधया भाषया परिचितदृष्टान्तान् पुरस्कृत्य प्रतिपाद्यमुपास्थापयदयम्। तेषां पुष्कलस्य साहाय्यस्यार्जने कारणमेतदेवाभूत्।

कथं यन्त्रनिर्मितं विदेशीयं वस्त्रं भारतीयस्य गृहोद्योगस्य विध्वंसं कार्षीदिति प्रदर्शयितुमयं मुम्बई महानगर्यां विशालमुत्सवाग्निं प्रज्वालयामास। प्रदर्शनमेतद् द्रष्टुं सहस्रं जनाः समागताः। यथा यथास्य ज्वालः सम्पूर्णं पुञ्जमासाद्य ऊर्ध्वमुखोऽवर्द्धत तथा तथा महान् हर्षध्वनिर्गुञ्जितोऽभूत्। अस्यानुष्ठानस्य संस्मारणे समालिखदयं विदेशीयस्य वस्त्रस्य परिधानं पापमिति विदेशीयं वस्त्रं ज्वालयित्वा अस्मदादयः कलङ्कमग्निसात् कुर्वन्ति।

गान्धीमहाशयस्य प्रेरणाप्रदे नेतृत्वे कांग्रेससंस्था भारतस्य स्वतन्त्रतायाः समर्थिकाऽभूत। इयं संस्था प्रत्येकजातेः पुरुषवर्गं नारीनिचयं चाकृष्टवती। संस्था चेयमिदानीं भारतीयेतिहासस्य धारामेव दिगन्तरे पर्यवर्तयत्। 1914 तमे ख्रिष्टाब्दे यदा गान्धीमहाशयो दक्षिण अफ्रीका देशं व्यसृजत्, तदाऽश्रूणि मुञ्चद्भ्यः सहस्रमितेभ्यो भारतीयेभ्यः सौहार्दपूर्णं सौप्रस्थानिकमभिनन्दनमलभत्। देशेऽस्मिन्नदृष्टपूर्वमेवंविधमासीत् सौप्रस्थानिकम्।

अनेकान् मासान् गान्धीमहाशयः भारतं पर्यभ्रमीत्। अस्मिन् पर्यटनक्रमे तीर्थस्थानानि पुरोहिताः व्यापारिणः भिक्षुकाः विविधविधा अन्ये मानवाश्च सम्मिलिताः। अयं सर्वदा निर्धनानां काठिन्यं विभक्तुं तेषां तथाविधानां कष्टं सहानुभवितुं तृतीयश्रेण्यां पर्यभ्रमीत्।

मातृभूमिस्वतन्त्रतायाः प्रेमी 1948 तमे ख्रिष्टाब्दस्य जनवरीमासस्य त्रिंशद्दिनात्मके महाभागः सन्ध्यायां "हे राम!" इत्युच्चारयन् धरां विहाय स्वर्गं गतः। साम्प्रतम् एतस्य स्थानस्य पूर्तिर्नितरामसम्भवा।

# अभ्यास प्रश्न

1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–

(क) महात्मनः किं नाम आसीत्?

अथवा महात्मनः पूर्णनाम किम् आसीत्? **(2019AT)**

अथवा गान्धिनः पूर्णनाम किमासीत्?

(ख) महात्मन: कुत्र जन्म लेभे?

**अथवा** महात्मागांधी कुत्र जन्म लेभे? **(2019AR)**

(ग) महात्मन: पितु: नाम किम् आसीत्? **(2019AS, 20MS, MT)**

(घ) पुतलीबाई स्वभावेन कीदृशी आसीत्? **(2019AU, 20MR)**

(ङ) केन नाटकेन तस्य हृदयपरिवर्तितम्?

(च) गाइल्स: क: आसीत्? **(2018HT)**

(छ) विद्यालय निरीक्षकेन किं पृष्टम्?

(ज) महात्मा गान्धी 'नेटालनगरे' कदा आगच्छत्?

(झ) स: दक्षिण अफ्रीका देशं कदा व्यसृजत्?

(ञ) मोहनदासस्य मातु: नाम किम् आसीत्? **(2018HQ, HR, 19AQ, 20MO, MP, MU)**

(ट) विद्यालय निरीक्षक: क: आसीत्? **(2018HP, 19AP)**

**अथवा** विद्यालय निरीक्षकस्य किं नाम आसीत्?

(ठ) महात्मा गान्धी किम् वाक्यम् उच्चारयन् स्वर्गं जगाम्?

**अथवा** गान्धी महाशय: किम् उच्चार्य धरांविहाय स्वर्गगत:?

(ड) महात्मन: गान्धिन: पिता कीदृश: आसीत्?

(ढ) धूमयानेन गाँधी कुत्र गत:?

2. प्रस्तुत पाठ के आधार पर महात्मा गाँधी का चरित्र-चित्रण कीजिए। **(2019AO, AP, AR, 20MP, MQ)**

3. दक्षिण अफ्रीका में रहकर गाँधीजी ने लोगों के लिए किन-किन कष्टों को सहा?

## वस्तुनिष्ठ प्रश्न

**निम्न चार विकल्पों में से सही विकल्प का चयन कीजिए–**

1. **महात्मा गान्धी ............ जन्म लेभे।** **(2019AU)**

   (क) नेपालदेशे (ख) बिहार प्रदेशे (ग) पोरबन्दरनगरे (घ) अफ्रीका देशे

2. **मोहनदास मातुर्नाम आसीत्–**

   (क) पुतलीबाई (ख) तितलीबाई (ग) कमलीबाई (घ) कस्तूरबाबाई

3. **विद्यालय निरीक्षकस्य नाम आसीत्–**

   (क) जेम्स (ख) रावर्ट्स (ग) गाइल्स (घ) मेकाले

4. **महात्मन: पितुर्नाम.................. आसीत्।**

   (क) करमचन्द गान्धी (ख) धरमचन्द गान्धी (ग) कृष्णचन्द्र गान्धी (घ) रामचन्द्र गान्धी

5. **पुतली गान्धिन: ............ आसीत्।**

   (क) पत्नी (ख) माता (ग) पुत्री (घ) शिष्या

6. **विद्यालय निरीक्षक: ............ आसीत्।**

   (क) स्टालिन: (ख) गाइल्स: (ग) पीटर: (घ) गजेन्द्र:

## ➡ आन्तरिक मूल्यांकन

गाँधीजी से मिलने वाली प्रेरणा पर अपने विचार अभिव्यक्त कीजिए।

●